णात्। बृहस्पतिनाप्युक्तम्। "सूतके मृतके चैव अशक्तौ श्राद्धभोजने। प्रवासादिनिमित्तेषु हावयेन्न तु हापयेत्" इति। तथा स्मार्त्तत्वेऽपि पिण्डपितृयज्ञश्रावणीकर्म्माश्वयुज्यादिकस्य नित्यो होमः कार्य्य एव। "सूतके तु समुत्पन्ने स्मार्त्तङ्कर्म्म कथम्भवेत्? । पिण्डयज्ञं चरुं होममसगोत्रेण कारयेदिति" जातूकर्ण्यस्मरणात्। यद्यपि साङ्गे कर्म्मण्यकर्तृत्वन्तथापि स्वद्रव्यत्यागात्मकप्रधानं स्वयङ्कुर्य्यात् तस्यानन्यनिष्पाद्यत्वात्। अतएवोक्तम्। "श्रौते कर्म्मणि तत्कालं स्नातः शुद्धिमवाप्नुयादिति"। यत्पुनः "दानम्प्रतिग्रहो होमः स्वाध्यायश्च निवर्त्तते" इति होमप्रतिषेधः। स काम्याभिप्रायो वैश्वदेवाभिप्रायो वा व्यवस्थापनीयः" इत्यन्तेन। संध्यादौ नामप्यपवादमाहापरार्के पुलस्त्यः "संध्यामिष्टिं चरुं होमं यावज्जीवं समाचरेत्। न त्यजेत् सूतके वापि त्यजन् गच्छेदधो द्विजः। सूतके मृतके चैव संध्याकर्म्म समाचरेत्। मनसोच्चारयेन्मन्त्रान् प्राणायाममृते द्विजः" १ यत्तु चन्द्रिकायां जावालः "सन्ध्यां पञ्च महायज्ञान् नैत्यिकं स्मृतिकर्म्म च। तन्मध्ये हापयेत्तेषां दशाहान्ते पुनः क्रियेति" यच्च संवर्तः "सूतके कर्म्मणां त्यागः सन्ध्यादीनां विधीयते" यच्च विष्णु० पुरा० "सर्वकालमुपास्ता तु सन्ध्ययोः पार्थिवेष्यते। अन्यत्र सूतकाशौचविभ्रमातुरभीतितः" इति तत् संपूर्णसन्ध्यापरम् "अर्घ्यान्ता मानसी सन्ध्या कुशवारिविवर्जितेति" शुद्धिदीपे च्यवनोक्तेः पैठीनसिस्त्वत्र मन्त्रोच्चारणमप्याह "सूतके सावित्र्याञ्जलिं प्रक्षिप्य सूर्य्यं ध्यायन्नमस्कुर्य्यात्" प्रयोगपरिजाते भरद्वाजोपि "सूतके मृतके कुर्य्यात् प्राणायामममन्त्रकम्। तथा मार्जनमन्त्रांस्तु मनसोच्चार्य्य मार्जयेत्। गायत्रीं सम्यगुच्चार्य्य सूर्य्यायार्घ्यं निवेदयेत्। मार्जनं तु न वा कार्य्यमुपस्थानं न चैव हि" एवं मिताक्षरापरिजातादौ अशौचे सन्ध्याकरणभेदस्योक्तेः गौड़ानां तदनाचरणमनाचार एव तस्य श्रौतत्वेन स्मृत्या बाधानुचितत्वादिति द्रष्टव्यम्। "ग्रहणादावप्यशौचापवादमाह व्याघ्रः "स्मार्तकर्मपरित्यागो राहोरन्यत्र सूतके इति" लैङ्गे "सूतके मृतके चैव न दोषो राहुदर्शने। तावदेव भवेच्छुद्धिर्यावन्मुक्तिर्न दृश्यते" प्रयोगपारिजाते "बृहस्पतिः "कन्याविवाहसंक्रान्तौ सूतकं न कदाचन"। महागुरुनिपातवर्षमध्ये कर्म्मविशेषेऽशौचम्। "स्नानं चैव महादानं स्वाध्यायं चाग्नितर्पणम्। प्रथमाब्दे न कुर्व्वीत महागुरुनिपातने" हेमा० स्मृतिः। महागुरवश्च माता पिता भर्त्ता च अतिगुरुशब्देनोक्ताः। "प्रमीतौ पितरौ यस्य देहस्तस्याशुचिर्भवेत्। नापि दैवं न वा पैत्रं यावत् पूर्णो न वत्सरः" देवी पु० अग्नितर्पणं लक्षहोमादि, न त्वाधानं तस्य प्रथमाब्देऽपि विधानात् यथा "पितुः सपिण्डीकरणं वार्षिकं मृतवासरे। आधानाद्युपसंप्राप्तावेतत् प्रागपि वत्सरात्" हेमा० उश०। अग्नितर्पणमित्यत्र अन्यतर्पणमिति शुद्धितत्त्वे पाठः। आधानादीत्यादिपदेन आवश्यक वृद्धिनिमित्तनित्यकर्म्मणोर्ग्रहणम्। श्राद्धकौमुद्यां देवी पु० "महातीर्थस्य गमनमुपवासव्रतानि च। संवत्सरे न कुर्व्वीत महागुरुनिपातने" एतदेकवाक्यतया प्रागुक्तवचने स्नानपदं काम्यतीर्थादिस्नानपरम् महादानसाहचर्य्यात् स्वाध्यायपदमपि काम्यवेदपारायणपरम् "तथैव काम्यं यत् कर्म्म वत्सरात् प्रथमादृते" लघुहा० वचनैकवाक्यत्वात् "महागुरुनिपाते तु काम्यं किञ्चित् न चाचरेत्। आर्त्त्विज्यं ब्रह्मचर्य्यं च श्राद्धं दैवयुतञ्च यत्" कालि० पु० "सपिण्डीकरणादूर्द्ध्वं प्रेतः पार्वणभुग्भवेत्। वृद्धीष्टापूर्त्तयोग्यश्च गृहस्थश्च सदा भवेत्" मत्स्य पु०। वृद्धीत्यनेन वृद्धिनिमित्तकसपिण्डनाभावे नाधिकारीत्यर्थः गृहस्थश्च सदा भवेदित्यनेन गृहस्थोचितनित्यपञ्चयज्ञेष्वधिकारः। अतएव पितृमरणाशौचोत्तरमेव वैश्वदेवश्राद्धं विहितम्। एवं वृद्धिश्राद्धाभावे वर्षपर्य्यन्तं तत्तत्कर्म्मण्यशौचमिति स्थिते "प्रेतकर्म्माण्यनिवर्त्त्य चरेन्नाभ्युदयक्रियाम्। आचतुर्थं ततः पुंसि पञ्चमे शुभदं भवेदिति" ज्योतिषवाक्यं शुभदमित्युक्त्या शुद्ध्यर्थचतुर्थाब्दकर्त्तव्यश्राद्धोत्तरं प्राशस्त्यमात्रपरमेव। एतच्चाशौचं वर्षमध्ये आवश्यकवृद्ध्यर्थसपिण्डनाभावएव। "अर्वाक् संवत्सरात् वृद्धौ पूर्णे संवत्सरेऽपि वा" इत्यादि स्मृत्यनुसारेण आवश्यकवृद्धिनिमित्तसपिण्डापकर्षे तु काम्यादिकर्मकरणयोग्यता। अत्र विशेषमाह लौगाक्षिः। "अन्येषां प्रेतकर्म्माणि महागुरुनिपातने। कुर्य्यात् संवत्सरादर्वाक् श्राद्धमेकं तु वर्जयेत्" प्रेतकर्म्म दाहाद्येकादशाहान्तं तत्राशौचान्तरस्याप्रतिबन्धकत्वात् "आद्यं श्राद्धमशुद्धोऽपि कुर्य्यादेकादशेऽहनीति निर्ण० सि० धृतस्मृतेः। तेन एकं सपिण्डनं वार्षिकादि च। एवं देवी० पु० वचनेऽपि पैत्रपदं पार्वणसपिण्डनवार्षिकपरम्। अत्रापवादः माधवीये ऋष्य० "पत्न्याः पुत्रस्य तत्पुत्रभ्रात्रोस्तत्तनयेषु च। स्नुषास्वस्रोश्च पित्रोश्च संघातमरणं यदि। अर्वागब्दान्मातृपितृपूर्व्वं सपिण्डमाचरेत्" लौगा० "पत्नीपुत्रस्तथा पौत्रो भ्राता तत्पुत्रकाअपि। पितरौ च यद्येकस्मिन् म्रियेरन् वासरे तदा। आद्यमेकादशे कुर्य्यात् त्रिपक्षे तु सपिण्डनम्" इदम् एकदिनमरणविषयमेव "महागुरुनिपाते तु प्रेतकार्य्यं यथाविधि। कुर्य्यात् संवत्-